CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.F.B.

Coll. No. 294

Title Bhatta Dipika

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 294 Subject: Pūrvamīmāṃsā

Title: Bhaṭṭ Dīpikā

Author: Khaṇḍa deva Scribe: —

Date of the work: — Date of the Ms.: V.S. १८४८

Place of the work: — Place of the Ms.: —

Size: 10 by 4.3" Extent: 39 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

प्रसं १

॥श्रीगणेशाय नमः॥ तत्र तत्र देवमनेकेषां प्रधानानामगृह्यमाणविशेषत्वेंऽगत्वं तत्र तत्र गृह्यमाण
विशेषत्वे त्वावृत्तिरित्युक्तं तत्र गृह्यमाणविशेषत्वेप्यन्यतरदुपकारलाभे प्रसंगेन वार्यसिद्धेर्नाभ
वृत्तिरिति प्रतिपादयितुं प्रसंगो निरूप्यते तत्र प्रसंगो नामान्यतरदुपकारलाभप्रयुक्तं गौणाननुष्ठानं अ
स्ति हीदं पशुपुरोडाशयागे प्रधानयागार्थानुष्ठितप्रयाजादिजन्योपकारलाभप्रयुक्तं गौणाननुष्ठानं
अस्ति च प्रणयनादेः पश्वर्थानुष्ठितगोदोहनादिजन्योपकारलाभप्रयुक्तं चमसाननुष्ठानात् अ
स्ति चाग्नेयादौ व्रीहिजन्योपकारलाभप्रयुक्तो यवाननुष्ठानात् अत्र चाननुष्ठानमात्रस्य प्रसंगात्वे
ध्येपि तदापतिरतः प्रयुक्तत्वांतमाद्यं विशेषणं अप्रयोजकेच वाजिनादौ नोपकारलाभप्रयुक्तं
दध्यानायनादननुष्ठानं अपितु वाजिनानुनिष्पन्नत्वादिप्रयुक्तमिति न तत्रातिव्याप्तिः प्रसंगः। वस्तुत
स्तु च तृतीयं प्रयोजकत्वाभावो प्रयोजकत्वं तदापि एवं च प्रसंगः। प्रसंगलक्षणानाक्रांतस्य प्रयो राम० १
जकत्वविशेषो वाजिनादौ हाबिति तयोर्भेदः। तेन आग्नेयोर्थानुष्ठितप्रयाजादिजन्योपकारलाभेपि अग्नि

माणविशेषत्वात्तदनुष्ठानं सर्वसाधारणत्वादग्नीषोमीयार्थमुपकारलाभप्रयुक्ताननुष्ठानाभावान्न
तिप्रसंगः। तदिहाग्नीषोमीयस्य वपाप्रचरणाग्नीषोमीयपशुपुरोडाशमेकादशकपालं निर्वपतीति
अग्नीषोमीयपशुयागांगभूते दर्शपूर्णमासिकाग्नीषोमीययागप्रकृतिके पशुपुरोडाशयागे
किं पाशुकानि प्रयाजादीन्यंगानि प्रसज्यंते उत भेदेनानुष्ठेयंत इति चिंतायां न तावत्पौरोडाशिकं
चोदकं प्रयोगविधिं च प्रयाजाद्यंशेप्युपगम्य केवलमनुष्ठानप्रसंग एवाभ्युपगंतुं शक्यः। प्रयोग
विधिना वपाप्रचारोत्तरकालविशिष्टस्य पुरोडाशयागप्रयोगविधौ तत्तत्पूर्वकत्वप्रयाजादीनां अ
कालकृतत्वेनोपकारकत्वानुपपत्तेः। यदि तु नायं कालविधिरपितु पशुपुरोडाशस्याख्यासहकृता
नुष्ठानसादेश्याद्वपाप्रचरणांगत्वावगतौ तत्प्रयोगांतःपातेनानुष्ठानसिद्धेरयं क्रमविधिरेवेत्युच्यते तथा
पि पुरोडाशयागार्थे प्रधानविधिनैवानुष्ठापितानां प्राकृतानां मानाभावकरणे वैगुण्यापत्तिरनिवार्यैवप
त्र हि पशुयागानां पुरोडाशयागानां च न दैवलक्षणंप तत्र सकलकरणे वैगुण्याभावेपि तंत्रत्वस्यैवापत्तेर्न

प्रसं
२

प्रसंगोपपत्तिःयत्रवैलक्षण्यंयथापशावेकादशप्रयाजास्तिष्ठंतिपशोःपृषदाज्येनानुयाजाएकादशवै
कृतयाज्यांतरयुक्ताःपुरोप्रयागाःशेत्तद्वापंचहविरासादनोत्तरकालीनाअनुयाजाःपृषदाज्येनतेन
वैगुण्यानापत्तिःअत्रावश्यंप्रसंगवादिनातद्देशाद्धाशस्यैवनव्यापारइत्यभ्युपगंतव्यंअस्तुतर्हित
द्देशेचोदकसत्त्वेपिप्रयोगविधिलोपःतथात्वेपुरोडाशोद्देशप्रवृत्तपुरुषकृतौप्रयाजाधकत्वायोप्र
यांनाद्देःकारत्वाभावेनपुरोडाशांगत्यानापत्त्याचोदकवैयर्थ्यात्तत्प्रययाजानुष्ठानस्यपशूद्देशप्रवृ
त्त्वेनपुरोडाशोद्देश्यकत्वाभावात्अथपुरोडाशयागानुकूलभावनायामेवप्रयाजाद्देरितिकर्तव्यता
त्वेनान्वयात्तदंगत्वमित्यस्येतेत्तथापिअनुष्ठानाभावेप्यंगत्वबोधकातिदेशस्वीकारेकृतस्तेनैष्प
वद्यात्तातिदेशायत्वात्प्रमाकरमतप्रवेशापत्तेःअथउपकारएषभावेनपदार्थानामतिदेशात्दुपका
रलोपइवान्यतदुपकारलाभेपिनपदार्थातिदेशःउपकारस्यसिद्धत्वेनजनकार्यस्याभावेनपदार्था दाम॰
नामतिदेशात्तदंशातिदेशकल्पनेप्रमाणाभावात्अतएवपुरोडाशातिदेशेनप्रयाजादिनजन्योवि २

जातीयोपकारणवात्तिदिश्यत्तेनतत्तज्जनकप्रयाजादिकमपिअत्तअपूर्वार्थक्रियमाणप्रयाजादि
भिरेवतादृशविजातीयोपकारस्यलब्धत्वात्तेनैवपुरोडाशयागेपितज्जननरूपफलोपपत्तेःप्रसं
गाविरोधःअतएवकालसंख्यायभावकृतेनवैगुण्यमपिप्रयाजानामेवानातिदेशेनतत्तद्भावेनते
षांसत्तरामननतिदेशात्इतिचेन्नतथात्वेपिपशुयागोद्देशेनानुष्ठितप्रयाजादिजन्यादृष्टानांपशू
पकारप्रत्येवफलोपधायकतयापुरोडाशयागोपकारकत्वानुपपत्तेःअन्यथास्वर्गोद्देशेनानुष्ठि
तदर्शपूर्णमासादितःपुत्रवत्स्याद्देरप्युत्पत्त्यापत्तेःअतःयत्रअपूर्वार्थक्रियमाणप्रयाजाद्येगैपुरोडाशोपका
रत्वानुपपत्तेस्तत्रदर्शपौर्णमासयानिप्रयाजादीनितानैवैकादशप्रयाजान्यजतीत्यादिनांगप्रधानसाधारण
प्रयाजाद्युद्देशेनैकादशत्वादिविधानात्सवर्कत्वेनेवतैस्तैःशोभयोपकारोपपत्तिःएकादशप्रयाजा
न्यजतिपश्वमेवतत्स्पृणत्तिएकादशानुयाजान्यजतीपश्वमेवतदनयजतीत्यादिनाएकादशत्वादी
नांपश्वपूर्वसाधनीभूतप्रयाजाद्यंगत्वावगमेनगृह्यमाणविशेषत्वयात्तेत्रत्वानुपपत्तेरितिप्राहे

प्रसं ३ सत्यमेकादशत्वादिगुणकंप्रजापतीयंपश्वर्थमेवतैरेवतत्पशुप्रयोगमध्यवर्त्तिनःपशुपुरोडाशया
गस्यप्रसंगेनोपकारसिद्धेर्नपृथग्यत्तदर्थमनुष्ठानंअतएवप्रसंगस्थलेऽन्यतःसिद्धोपकारलाभ
त्पुरोडाशप्रयोगविधिर्लाघवेननोक्तपकारजनकीभूतंप्रयाजादिमनुपपत्तिनवात्तदीय
चोदकस्तदतिदेशप्रयोजनाभावात्‌अतएवोपकारमात्रोपस्थापकातिदेशानचतैःप्रत्यक्षपूर्वजनकत्वे
ग्यतामात्रस्यैवजननेनपुरोडाशापूर्वानुकूलयोग्यतायाअपिसामग्रीसत्वेनोत्पत्तौवाधकाभावा
त्तनह्येकंकारणंयुगपत्क्रमेणवाऽनेककार्यंजनयतीत्यत्रनियामकमस्तिएकस्यैवघटस्य
युगपत्क्रमेणवारूपरसंयोगाद्युत्पादकत्वदर्शनात्कामेष्टेशनान्वषिततदर्शपूर्णमासजन्यपूर्व
न्नित्यप्रयोगीयपापक्षयस्याप्युपपत्तेश्च।सामग्रीभेदस्यप्रकृतेपिसमानत्वाचएकस्मात्कारणा
द्युगपदेककार्यतावच्छेदकावच्छिन्नस्यैकस्योत्पत्तिरितरथाघटद्वयोत्पत्तिरपियुगपदापद्येत। राम० ३
अतःसर्वेष्वपिदर्शपूर्णमासादिष्वपदानर्थवादोपात्तकाप्रशस्त्यानुरोधेनप्रवृत्तिप्रयोजककामना

विषयत्वस्यैवोद्देश्यतावच्छेदकत्वेनस्थापितत्वात्तदवच्छिन्नस्यैकस्यैवयुगपदुत्पत्तिर्नानेकस्य
नचतर्हिक्रमेणतस्योत्पत्तिप्रसंगःपूर्वोत्पन्नकार्येणापूर्वस्यनाशेनतदुत्पत्तौबाधकाभावात्‌न
चैवमिहापिप्राथमिकेनपुरोडाशपरमापूर्वेणप्रजादिजन्यादृष्टनाशात्प्राप्ताप्तपशुपरमापू
र्वोत्पत्त्यनुपपत्तिलाघवेनोद्देश्यतावच्छेदकावच्छिन्नस्योपपूर्वनाशकत्वाङ्गीकारान्‌अतस्तत्का
र्यानन्तरोत्पत्तौनकिंचिद्बाधकमितियुक्तएवप्रसंगःसंग्रहकालादिकत्तेवप्यणपनृत्यलयेवनिरस्तं
॥जैमिनेःयानित्वंगाणिआज्यभागावद्यत्ताहीनिपशौनविद्यन्तेनापिपुरोडाशेकर्त्तव्यानिनवा इ
तिचिंतायांपुरोडाशभावनायाइतिकर्त्तव्यताकांक्षायांसन्निहितयापशुकर्माचोदकप्राप्ततिपतितांगजन्यो
पकारगणानेवोपस्थितत्वेनस्वापूर्वजननानुकूलयोग्यताजनकत्वमात्रकल्पनयाइतिकर्त्तव्य
ताकांक्षाशांतेर्नपुरोडाशविधिनास्वतंत्रचातिदेशकल्पनंगौरवात्‌अतश्चपृथग्ग्रहमेधीयस्य
स्तोपकारस्यभागाभ्यामेवनिराकांक्षत्वान्नातिदेशकल्पनेतथाप्रकृतेपिलिंगैरेवोपकारोनि

प्रसं राकांक्षत्वादतिदेशकल्पनानुपपत्तेर्नाज्यभागादीनामंगत्वप्रसारणमस्ति अत एव प्रयोजनवर्गाभावा
४ त्पुरोडाशप्रयोगविधेरपि प्रधानमात्र एव व्यापार इति भेदेन तज्जन्योपकाराशेवेत्यपि लभ्यते एवं न चैव
मप्येकादशकपालसंपादकसंनिपत्योपकारकांगापेक्षयैवातिदेशकल्पनेन तथात्वे गृहमेधीयेपि
तदापत्तेः। वस्तुतस्तु अनोवाससोधिकरणन्यायेन लोकसिद्धैकादशकपालस्यैव ग्रहणान्न प्रयोगम
ध्ये तत्करणावश्यकता गृहमेधीयचरोस्तु वादनिकानामेव कतिपयानां सन्निपत्योपकारकाणां
पाठात्प्रयोगमध्यकरणमिति विशेषः। अत एवाज्यभागादीनां पुरोडाशार्थकरणमिति प्राप्तेष्या
द्युकाणोपकाराणां पुरोडाशापूर्वजनकतानुकूलयोग्यता प्रतीतेस्तच्छिन्नातीयापूर्वत्वेनैव वस्तुतो
जनकत्वेपि तत्कार्यं कारणाभावबोधकपदकल्पनायाननात्र वस्तुतो पुरोडाशयागप्रधानीभूतपश्वपूर्व
संबंध्यंगजन्योपकारैर्योग्यताभाववदिति यद्वा विधाकल्पना॥ तथा तेऽपूर्वाणामणुपपादकत्वाद्भिन्ना राम
न्यापूर्वाणामेतद्योग्यताजनकत्वापत्तेः न चेष्टापत्तिः यौगिकांगजन्यापूर्वाणामपि सर्वनी ४

योपकारजनकत्वप्रसंगात्तत्रापि दृष्ट्वातिदेशानापत्तेः यश्च पूर्वसंबंध्यंगजन्योपकारस्तस्य पुरोडाश
जन्यापूर्वे वाधितत्वात् पादिजन्योपकारे चातिप्रसक्तत्वेन तादृशपदस्य कल्पयितुमशक्यत्वाच्च
अतोऽवश्यं स्वप्रधानीभूतपश्वयागसादृश्योपस्थितसान्नाय्यसंबंध्यंगजन्योपकारैर्निरूपितयोग्य
ताभाववदिति कल्पना अतश्च युक्त एव पुरोडाशे सौमिकधर्मातिदेशः। तेन च सर्वोपकारेषु तत्त्व
भावेन पदार्थातिदेशे वाच्ये येषामुपकारोऽप्राप्तो न लभ्यते तद्देशे पदार्थातिदेशस्य तत्प्रयोगावि
धेरवश्यकल्पत्वाद्युक्तमेवाज्यभागादीनां करणं यत्तूपकारात्प्राप्ततोलब्धास्तद्विषयेऽतिदेशप्र
योजनाभावान्नातिदेशः पदार्थानां उपकारांशे चास्येदम् । यद्यपि च नोपकारस्य पृथगतिदेशो गौरवा
त् अतिदेशलक्षणस्याव्याप्तेश्च तथापि एकैनैवातिदेशेन प्राकृतोपकारद्वारा पदार्थानां विकृत्यासंबं
बोधयति पकारस्यापि विकृतिसंबंधावगमात्सिध्यत्तित्स्याप्यतिदेशविषयत्वं तत्त्वं च प्रसंगस्थलेऽ
तिदेशेन प्राकृतोपकारद्वारा अन्यत्तदुपकारलाभादेव पदार्थाविधानात् तल्लाभे उपकारसंबंधसिद्धौ

प्रसं ५ त्वपि पदार्थविधायकत्वाभावान्नातिदेशेन पदार्थानामनुष्ठेयत्वाभावाच्च न प्रयोगविधिरपि अतश्च
न सर्वत्र प्रकृतौ विकृतौ चाग्निविधिपुरोडाशं वाक्यार्थः अन्यतदुपकारालाभे अग्नेनांगेन योग्यतांसंप
द्यते इति। अत एव प्रकृतौ विकृतावपि देवातिदेशिकतिप्रयोगमध्ये अनुष्ठाने प्रसंगेनोपकारलाभे अन्ने
न प्रयाजाद्यनुष्ठानं पशुपुरोडाशेपि च देसे निष्पत्तया पयाशक्तिः कादृशप्रयाजाद्यनुष्ठाने नापि वि
यमाशोपुरोडाशाद्यनुष्ठानं शास्त्रेण नैव पेच प्रयाजाद्यनुष्ठाने तस्य च पशोरपि प्रसंगित्वं अन्यतदुपकारला
भस्याविशिष्टत्वात् अत एव तत्र मध्यपातादिकमपि कारलाभोपलक्षणमेव च अतोय आन्यतदुपकारला
भस्तत्र नकपदार्थाशेन वाप्तिदेशेन वा प्रयोगविधिरिति तत्तद्भावेनभवतीति सिद्धं न चैवमप्रयो
ज्येपि प्रयोगविध्यभावात् प्रसंगतो विशेषानापत्तिः अन्यतदुपकारालाभे प्रसंगस्थले प्रयोगविधिसत्वे
न तत्तो भेदात्तत्वस्तस्य च तदर्थित्तप्रयोज्यत्वाभावादरावाप्रयोज्यत्वे तद्भिन्नमेव चोदकविध्यप्रसंगत्व
मिति नाभेदः सेकाप्रयोज्यत्वमात्रमेव तत्प्रसंगत्वमिति ध्येयम् पत्नीचोदकप्रयोगविध्यारूभयोः राम० ५

सत्वेपि प्रयोज्यताभावादनुष्ठानमिति प्राभाकरमतं तत्तद्विधिना विहितस्य गुणविशेषविशिष्ट
स्य प्रयाजादेरनुष्ठाने विहितगुणाभावेन प्रयोज्यत्वलाभानुपपत्तेरुपेक्षितं अस्मन्मते तु गुणवि
धानाभावादेव नवैगुण्यमिति विशेषः यत्वासिन्नधिकरणे मते प्रयोगविधिमंगीकृत्य चो
दकलोपेन पूर्वपक्षकरणं चोदकागिकारे प्रयोगविधिमात्रलोपेन च सिद्धान्तकरणं तन्मिथ्यु
क्तं कृत्वा प्रयोज्यताभावाच्चोपेक्षितं नानार्थत्वात् सौमिकामहावेदिदेशत्वे नांगप्रधानार्थत
त्वुक्तं ततीयेतदाह्नपतिशस्यामहेस्यां कर्तृमिति महावेदिस्तसर्वोऽस्थेवारणवत्तेन महावे
दिकरणोत्तरं यानिदृष्टिपश्वादीनि दर्शपूर्णमासविकाराणि सोमांगानि कर्माणि तत्र महावे
रासाद्यनुरूपस्यागस्य महावेदिधर्मकत्वोपदेशादातिति देशिकधिकवेदेस्तद्दिकशारणा
स्य च वाधाद्युपविचारमेव यद्रुत्वमेनार्थवादिकोगमनोदितरूपकर्तृप्रवारमात्रार्थत्वं महावेदे
स्तदाकृत्वाच्चिंतपौर्विकातादृशकर्मतोह विरासादनार्थे रोध्रिकवेदिस्तद्वैदिकरणस्य कार्यासिध्य

प्रसं ६ भावात्प्रसंगासिद्ध्यनुपपत्तेरैष्टिकवेदिकरणेन त्वोसंयावत्तद्विरासादनीयं न हि ऐष्टिकसौमि
कवेदिकरणयोस्तद्विधोर्व्यर्थत्वे प्रत्यभिज्ञापकाभावात्प्रकरणेन तस्य च वेदिकरणभेदप्रती
तेः। सत्यपि वेदिशब्दमात्रस्यैकत्वे तद्व्याख्यानेन तत्परिमाणविशिष्टदेशविशेषरूपाभिन्नत्वेन तत्त
द्वेदिभेदाहितिप्राप्ते सत्यनकर्त्प्रचारेणाहविरासादनस्य प्रसंगासिद्धिस्तस्य पृथगनुष्ठानाव
श्यकत्वात्तथापि महावेदिसंपादकवेदिकरणेनैष्टिकवेदेरपि सिद्धतयानैष्टिकवेदिकरणस्य
पृथगनुष्ठानं वेदिर्हि न परिमाणविशिष्टदेशविशेषः तस्य स्वतःसिद्धत्वेन वेदिकरणजन्यत्वा
नुपपत्तेः। वेदिकरणसमारब्धयागस्य वेद्युत्पादकत्वाद्यागतेश्च किंतु अदृष्टविशेषावच्छिन्नदे
शविशेषोऽदृष्टमेव चात्र च विशेषणं तत्तस्य देशस्य वेदिकरणात्तन्मत्वाद्दृष्टमेव तज्जन्यत्वे
वेदिशब्दस्यानर्थकत्वपरिहारायैकजगत्तीयमेवेति सौमिकवेदिकरणेन तस्य जातत्वाद्दृष्टावि
शेषावच्छिन्नाहवनीयप्रत्यनकदेशस्यैष्टिकवेदिपदार्थस्य सिद्धेनैष्टिकवेदिकरणानुष्ठानं राम० ६

न च वनेकजातीयादृष्टं वै प्रतिवेदिकरणारणादृष्ट्यस्यकारणत्वे व्यभिचारस्य करयोरापत्तिः गत
तत्कत्व एवं साधनीभूतवेदिरूपादृष्टं प्रति न वेदिकरणस्य कारणत्वादृशां वेदिकरणान्तरप्र
सक्तेः प्रकृते लद्दृष्टमात्रस्यैव लाघवेनाभिदिष्टतया तज्जनकवेदिकरणाविशेषस्यानतिदेशादि
त्ति कौस्तुभेऽराववसंमतांगोऽधिकरणे स्पष्टं स्पष्टं यावत्रषुत्योभिकानां ग्रहचमसादिपात्राणामासादनेनोत
रं यानिधिवि कारणिताम तनायपश्चाद्देनि तेषु तैरश्चोपात्तैः कार्यासिद्धेर्नैष्ठाकृतत्रद्वृदि पात्रासे
पकत्वत्वमितिप्राप्ते न तावत्तैः सोमप्रक्षेपेणाहविरंतरप्रक्षेपसिद्धिः। तस्य पृथगनुष्ठानावश्य
कत्वात्तद्हविरंतरप्रक्षेपादौ च न ग्रहादीनां कारणतात्प्रामाणिकी त्वेपदेशातिदेशयोरभावात्
प्रयाजाद्यदृष्टानां हि पुरोडाशोपकारकत्वे अतिदेशेनसिद्धेपृथक्यसिद्धनामेव तेषां मेध्योपजी
वनं प्रवृत्तेत्तु सौमिकानामेतत्प्रक्षेपाद्यांगत्वे प्रमाणाभावान्महावेदिवद्ग्रहचमसेषुभाकारवि
शेषविशिष्टकाष्ठविशेषत्वादिरूपज्जुहत्वादिरूपत्वे प्रमाणाभावात्तिशेषिकपात्रारणाबाधात

प्रसं
७

विलायामेवोपायान्तरत्वेन लाघवस्याप्यभावान्नात्र प्रसंगसिद्धिः। अत एव सुत्यादिने पुनाग्निमे
पृथिवी ज्योतिषा सहेति द्वाभ्यामभिमृशति। तदादिनारब्धविकृपात्राणामभिमर्शने विहितं। अत
एव ग्रहैर्जुहोति। त्याहिनांगप्रधानसाधारण्यामसेपानुवादेन हिरण्यमध्यः स्रुचो भवंतीव ग्रहादि
विधानादुपवेशनेन वहविरंतरप्रक्षेपग्रहाद्यप्राप्तेरैष्टिकयात्र वाध इत्यप्यपास्तं तयात्वे ध्रुवं
द्दर्शनवैयर्थ्यात् ग्रहादीनां सोममात्रार्थत्वे गमकोत्तराणामपि सत्वाच्च शामित्रे च देशना
मित्रे प्रणयतीति विहितः पशुयागे शामित्रोऽग्निः पूर्ववद्देवपुरोडाशपावेन प्रसक्ते किं
आतिदेशिकगार्हपत्यकार्ये शालामुखीय एवात ऊर्ध्वं गार्हपत्यो भवतीति वचनेन विहितः।
शालामुखीय एव नुधास्यमानामवचनत्वादंगप्रधानसाधारण्यानुवादेन विहित
शामित्रेण शालामुखीयवाद्योपपत्तिः शामित्रशब्दस्य शमनसंबंध्यग्निवाचित्वात् पशोरपि शम राम०
नसंबंधावगतेस्तस्य च पशावेव साक्षात्साधिकरणेन सत्वात्पशुश्रपणदेशे नैव शामित्रवि ७

धिप्रतीतः। अथ प्रणीतो आहवनीयादुत्तरवेद्यामग्निप्रणयनोत्तरं अवशिष्टाहवनीयस्य शाला
लामुखीय इति संज्ञा स एव शालामुखीय एवात ऊर्ध्वं गार्हपत्यो भवतीति वचनेनाग्निप्रणा
यनादूर्ध्वं गार्हपत्यकार्ये विनियुक्तः गार्हपत्यस्यानंतरं दाध्यप्राजहित इति संज्ञा कौंडपायिनां
मयने च चोदकपरेपरयास र्वेमिद्धमतिदिष्टं तत्र मासाग्निहोत्रमपि सर्वोपसदत्तरकाली
नसायंकालकर्त्ताव्यग्निप्रणयनोत्तरमिदं तदीयमपि प्राग्शालासु स्वीयस्य प्रवृत्तत्वात्तत्रै
वस्यात्तनक्षत्रशामित्रच मासाग्निहोत्रमपि परोच स्यांगता प्राह कप्रमाणाभावः चोदना
लिंगातिदेशस्यैव प्रमाणत्वात्तत्तन्वत्तद्वेदस्याप्रवलनामातिदेशप्राप्तिप्राजहितेन तस्या
धादनेन गात्वे कार्योत्तरे प्रवृत्तस्यैव शालामुखीयस्य लाघवादिनयज्ञौदनेन नामातिदेशस्यैव प्रा
जहितविषयत्वाकल्पनात् शालामुखीयस्य प्रकृतत्वादग्निप्रणयनोत्तरकालीन यज्ञभाग
धर्मत्वेन प्रधानाश्रितत्वात्तेन नामातिदेशप्राप्तिसवाधोपपत्तेश्च प्राजहितसमारब्धात्

भाट्ट
८

स्यकार्यसाधनत्वाभावप्रतीतेः। अत एवोपादानलाघवानुरोधेन शालामुखीयस्यैव प्रसंगेन गृह
याल्प्राजाहितस्य निवृत्तिरिति प्राप्ते नात्र किंचिदुपादानलाघवं शालामुखीयस्य कार्यान्तरे प्रवृत्तत्वेपि त
त्कार्यस्य प्रयोगनखेन लाघवाभावात्तत्सन्निहितत्वमात्रस्य प्राजहितेपि सत्वाच्च न च भागाधर्मत्वेन प्राधा
नाश्रितत्वाच्छालामुखीयस्य प्राबल्यं प्रधानाश्रितस्याप्यंगेषु कल्प्यत्वेन स्वाश्रितप्राजहितापेक्षया दुर्ब
लत्वात्तमासन्निहोत्रस्यापि कोऽपादिनामयने प्रधानत्वेन प्रकरणेनाधिकरणस्थापितत्वाच
वस्तुतस्तु नायं भागाधर्मः प्रहार्थेव प्रागस्यापि स्ववाक्येऽक्तत्वाभावात् योग्यतया साक्षात्सदा येधर्म
त्वेसैव युक्तत्वाच्च अत एवापूर्वे मासाग्निहोत्रे न शालामुखीयस्यागत्वप्रसक्तिः। वस्तुतस्तु न कोऽपि प्रानाम
यनेत्वेनैकोऽतिदेशः प्रमाणाभावात् पितृत्वहाभिततसोमयागत्वेनाभिन्न एव अत एव शालामुखीयस्य
प्रकृतौ प्रकृतापूर्वसंबंधि गार्हपत्यकार्य एव विनियोगेन त्वसंबंधितत्वार्थे अत एव मासाग्निहोत्रेत्तर राम॰
त्तिदेशप्रवृत्तौ प्रमाणाभावात्तत्वातिदेशेन प्राजहितप्राप्तिरविकलैव अत एव प्राजाहितसंज्ञापि सो ८

मयागापूर्वसाधनीभूततत्कार्ये एवेति ध्येयं। न हविर्धाने शामसोमधारणार्थे द्विरा कटे हविर्धानसंज्ञ
के प्ररोपीय हविर्धानमंडपे समंत्रके स्थापितेऽत हृत्तरं च यानी शिविकाद्वित्तेषु अतिदेशप्राप्तानो धिक
रणको निर्वापः समर्थयोरेवान ज्ञोरन्यतरच्च कर्तव्यः। अवसावच्छिन्नस्य साधनत्वविहितस्य परप्र
त्तस्य सलाभे च तत्रानोतराक्षेपकल्पनानुपपत्तेरिति प्राप्ते न तावदत्र वृमियमेन स्वदेशस्थापितस्य
न सो निर्वापदेशे शालामुखीयस्याभ्यागेन यनेसंभवति तयोर्हविर्धारणाव्यापृतयोर्हविषं उत्
रणात्तत्रियाराच वैगुण्यापत्तेः। अथ प्रसंगेन एव तद्देशाभावकृतवैगुण्यं लाघवानुरोधेन सोढव्यम् हवि
र्धानदेश एव तद्दपरि एकदेशावस्थितं सोमे सत्यपि निर्वापो विक्रियते ततो नोत्तरश्च हृतोयनमान
गृहे कार्यान्तरार्थमनोत्तरसत्वे लाघवास्पदत्वे स्यत्वान देशाभावकृतवैगुण्यप्रसहनेपपदापितस्या
वस्तदापितस्य सोपकल्पनमेवानुपादेयदेशबाधापेक्षया युक्तमास्थापितेऽन्यहुपदेशेऽनसोमत्र
पितृनिर्वापांगे अत एव तदर्थत्वागापेक्षया पदार्थासेपस्यैव यासिकस्य न्याय्यत्वान्नात्र प्रसंगः। नघुक्त

भा॰द्वा
९

सोमश्चवर्द्धस्पकालीनरात्रिजागरणमाम्नानंदर्शपूर्णमासयोरपिअग्नीपवसथ्येहनिजागरणमा
म्नातंतदतिदेशेनसोमांगेष्विपपशुप्राप्तंसोमांगजागरणेनप्रसंगः।अथेनइतिप्राप्तेयदितावज्जागरणं
यज्ञसाधनरक्षणार्थाद्वाहाअप्रमादार्थंतदाअन्यकालीनजागरणेनअन्यकालीनेष्टांगभूतपदार्थ
रक्षणासंभवान्नप्रसंगः।नहिकापिसोमांगभूतेष्टिर्हिंसारात्राववस्थितेहोमसंलीया।सद्यस्कालावा
दिनएववसत्वात्प्रायणीयादीनांभिन्नकालतास्पष्टेनअप्यदीक्षितत्वात्रात्रिजागरणंतत्रयास्वरसेन
व्यावर्तितइत्यर्थेवादान्तस्मात्स्वप्रव्यावर्तितफलकजागरणस्यादृष्टार्थत्वप्रतीतेस्तदृष्टस्यसो
तिष्टोमपरमापूर्वीयस्यविधिसमापितत्वात्तेनैवप्रसंगसिद्धेर्नक्षिप्युपृथक्जागरणमितिचेत्तथात्वे
पिदार्शिकजागरणस्यादृष्टार्थत्वेनप्रसंगानुपपत्तेः।तस्मात्प्रदृष्टार्थत्वेपिचप्रकरणांतरन्यायेनवि
जातिचेत्तयोर्जागरणयोरेकादृष्टजनकत्वप्रमाणाभावेनाविजातीयादृष्टेविजातीयादृष्टजनक
क्रियाप्रसंगानुपपत्तेः।नचअदृष्टवैजात्येपिदर्शश्राद्धेभवतीपात्तश्राद्धस्यप्रसंगसिद्धिरितिकाल

राम॰
९

दर्शश्राद्धेयुक्तंतत्रायवश्राद्धभावाविशेषनयाकालैकाननिमित्तद्वयसंपातेतंत्रस्यैवोक्तिचितत्वात्।एते
नादृष्टसाजात्येपिनित्यकाम्यदर्शादिष्टसत्वेपिअगत्याप्रमाणविशेषतयातेत्वमेवनतुकाम्यत्वे
ननित्यस्यप्रसंगः।प्रमाणाभावात्कामेसतितस्यचनिमित्तस्यापिप्रयोजकत्वस्यप्रामाणिकत्वेन
तदभावकल्पनायोप्रमाणाभावात्इतरथाकामनायाःफलोत्पत्तिप्रत्येवकारणत्वकल्पनेनवै
यरीत्यस्यापिवक्तृशक्यत्वात्व्यक्तिभेदेपांकाम्येनगोदोहनेनादिनानित्यचमसकार्यसिद्धिःप्रसंग
नेतितद्विषयेकाम्येननित्यसिद्धिःप्रसंगेनेतिप्रवादः।अस्तुवातादृशस्यत्वेपिप्रसंगः।तथा
पिअदृष्टवैजात्येनैवकचित्प्रसंगः।अतएवअवभृथेचरेत्कृष्णमतिकृच्छ्रंविपात्तेनोक्तमितिकेचि
ऽस्वरूपातइत्यत्रास्वरूपात्तद्रूपव्यापनिमित्तिकप्रायश्चित्तेनव्यापकनिमित्तरूपावगणाशक्य
निपातनिमित्तकप्रायश्चित्तयोःसजातययोरेवप्रसंगसिद्धिविज्ञानेश्वरेणोक्तत्वात्तत्रापितंत्रेप्रसं
गोवेतितत्स्वयमहोविजातीयेतुनैवकिंचिद्वचनंविनाप्रसंगइतिप्रकृतेअदृष्टार्थत्वेपिजाग

भा॰दी॰
१०

रणायाने प्रसंगगमंत्राश्च वरणप्रयाजेषु दक्षिणोत्तरविहारयोर्योर्दर्शभेदात्कर्तृभेदवस्तुतस्तु द
र्शपूर्णमासयोरपि परिशिष्ठा त्रिग्रणां विहितं तत्र दीक्षणीयादेः सद्यस्कालत्वात्तंत्रतत्वोपएवेति
कप्रसंगः। मंत्रांश्च वरणप्रयाजेषु दक्षिणोत्तरपि विहारयोर्दर्शभेदात्कर्तृभेदाच्च पदार्थानां न तंत्रतेति
स्थितं तत्र च प्रयाजादिविषये मस्योन्यग्रहस्य न्याय्यत्वान्मादृशान्याय्य प्राप्त प्रसंगोपदेशाध्वर्युः करोति
तत्प्रतिप्रस्थाता करोतीति वचनेन बाध्यते इस पुनरुक्ते वा अतस्तत्तावत्पृथगेव कर्तव्याः मंत्रास्तुपर्य
स्मरणार्थास्ते अध्वर्युणा तावत्पठनीयाः तत्तन्ध्न तेन समंत्रेषु पदार्थीकृते पश्चात्प्रतिप्रस्थात्रा तत्पदार्थक्रि
यमाणोध्वर्युः प्रतिप्रस्थातृ कर्तव्यपदार्थयोः क्रमविधानात्प्रतिप्रस्थातृ कर्तृक पदार्थस्याध्वर्युकर्तृ
कपदार्थेनोपस्थितसिद्धेर्मन्त्रकार्यस्य प्रसंगसिद्धानमेवाणांप्रतिप्रस्थात्रा एव यकपाठ इति मा
त्तनिर्दर्शमानीत्यादि मंत्रे वात्मा भिवादित्तयाश्रात्मकर्तृकनिर्वापस्मृतेरेव कार्योपयोगितया लाह राम॰
स्याश्चानतोऽप्रलाभानादसंगः। वस्तुतस्तु परेच्छा धर्मर्युः करोति त्यनेन क्रमविधिः प्रसंगरभावा १०

मात्रफलकतया तादृक्पदार्थकरणमात्रविधानात्कर्तृभेदेन पाठक्रमस्याप्यनियामकत्वाच्च अतो
युगपदेव द्वाभ्यां समंत्रकाः पदार्थाः कर्तव्या इति कप्रसंगाच्च काशः। धारणार्थत्वात् दर्शपूर्णमास
योः प्रणयनोत्तरं प्राकृपरणीत्तं तांग्नीनां समंत्रकमाधानं सन्निधने विहितं तत्र अतिदेशेन सोमांगेष्टि
पशुचेंधादौ दीक्षणीयादिरूपे प्राप्तमपि न कार्यं ततः पूर्वमेव सांगसोमकरणार्थं प्रणयनाद
इतरं सन्निधानस्य कृतत्वात् यद्यपि तत्र मंत्रकार्यं प्राप्तं च तथापि तादृशेनैव कार्यस्य जातत्वा
न्न दीक्षणीयादिषु पृथगनुष्ठानेन च एकवारं सन्निद्धस्य पुनरिध्मार्थं समंत्रकसन्निधानो
पपत्तिः॥ यमाग्ने वर्चे इति पूर्वमग्निपरिग्रहात्तीत्यनेन प्रणयनाद्युत्तरकालीनमथ मान्वाधा
नवमंत्रविधानान्न च पूर्वं परस्याग्निपरिग्रहणमानाधिकरण्येन्नात्वनीयपरत्वात्प्रतिप्रधानं
गृह्यांवृत्तिन्यायेन प्रतिधारणां मंत्रावृत्तिः। बोधायनेनास्य गार्हपत्यान्वाधाने विनियुक्तेस्तया
पूर्वं परस्य क्रियाविशेषणत्वमंगीकृत्य प्रथमान्वाधानविधिपरत्वात् अत एव देवतारोव

भा॰द्वा
११

पर्वेद्युर्गृहीत्वाग्वोभक्तेयन्नंतद्इत्यर्थेवाहानुरोधात्सर्वेपदपर्वेद्युःकास्यपरमितत्वपिकेषेचिदत्रप
राक्तेनलक्षणापत्तेः पूर्वेद्युःकालीनानेकसन्निधानेसंज्ञापत्तिप्रसंगाच्चप्रकृतौसद्यस्कालायोरन्या
धानकरणानापत्तेश्चद्वीप्सरणीपादेःसद्यस्कालत्वाप्रसंगासिद्धिकथनस्यानृततिमहत्वाच्च अ
तोस्मदुक्तरीत्यैवाध्यानेमंत्रविधेर्युक्तएवहीप्सरणीयादेःप्रसंगः। तथाव्रतेदर्शपूर्णमासयो
रग्रेव्रतंपतञ्जुतिमंत्रेणाव्रतग्रहणमाम्नातंव्रतेनानृतस्यवदनब्रह्मचर्यादिसंकल्परूपेसत्य
वदनंहिसवैसत्यमेववदेतिशतपथेविहितंसइतिकर्तृव्यापाहानेनकृत्यस्यपुरुषधर्मः। अ
तएवनानृतंवदेदितिप्रकृत्यनुधर्मात्वात्संयोगांतरे अन्यत्तरेणान्यतरस्यलैप्ययपथ्यशंकानश
क्यांतरीयत्वादपास्ता एवंसब्रह्मचारीश्रमधुमांसाशीस्यादितिब्रह्मचर्यविधावपिज्ञेयंस्त्रप
गमनमांसमतिषेधेनुशास्त्रांतरीयइतिनविरोधः। ततश्चमपिव्रतेसोमागोपिपश्वादिषुनका राम॰ ११
र्येहीप्सणीयोत्तरसोमार्थकर्तनेचदीक्षाद्रूपव्रतग्रहणेनआवश्यमविरसृहेनप्रसंगसिद्धेः

नचैषिकसौमिकव्रतकरणयोर्विनातीयाहृष्टजनकयोःकथंप्रसंगः। विजातीययोरपितत्रै
णापरियालितयोर्विजातीयादृष्टजनकत्वोपपत्तेः। अतएवसत्यवदननियमाहिपारिषा
लनस्पत्तत्रत्वेपिसोमार्थंकृतेनैवतत्संकल्पेनेचतत्कार्यसिद्धेर्नपृथक्संकल्पकारणसके
त्संकल्पितस्यपुनःसंकल्पवैयर्थ्यात्व्रतवर्तमानतादृशायांव्रतेचरिष्यामीतिमंत्रलिंगा
नुपपत्तेश्चनचयाचज्ञीवंपुरुषार्थसत्यवदनेनियमसंकल्पेकृतोपिपाथादर्शपूर्णमा
सज्योतिष्टोमारोपुनस्तत्संकल्पकरणंतथासोमार्थतयाकृतेपितत्संकल्पेनदर्शादिपश्वा
दिषुपुनस्तत्संकल्पकरणंनविरुध्यतइतिवाच्यंपुरुषार्थतत्पाकृतस्यापिसंकल्पस्यक्रत्व
र्थतयापुनःकरणेवाधकाभावात्सत्यवदननियमस्यत्वेपिब्रह्मचर्यादिसाधारणव्रतसामान्य
संकल्पेवाधकाभावाच्चप्रकृतेतुसामान्यसंकल्पस्यैवसोमार्थकृतत्वाद्दीक्षाद्यर्थपुनःकरणं
विरुद्धमितिविशेषः। नचैवमपिसोमार्थस्यव्रतस्यकर्तृसंस्कारद्वाराअंगप्रधानसाधारण

भा०दी० त्वयाइष्टार्थत्वस्यापि सत्वान्महावेदिवदौपदेशिकेन वृत्तसंकल्पेनैषिकस्य बाध एव स्या
१२ त्तत्प्रसंग इति वाच्यं दीक्षा सोमस्येति वचनेन यमनियमपरिग्रहरूपव्रतसंकल्परूपायादी
क्षायाः प्रधानमात्रार्थत्वेनांगसाधारणत्वाभावात् अतो युक्त एव प्रायणीयादिषु प्रसंगः । दी
क्षणीयायां तु सोमार्थव्रतसंकल्पस्य दीक्षणीयोत्तरत्वात् असंगानुपपत्तेर्युक्तादेवैषिकप्र
ग्रहणात् द्विसर्गो धौधायनादृपस्कन्तस्यामपितोनेक्षेति ।। ग्रहणार्थं च पदृत्तमग्न्याधा
नस्य साधारणार्थत्वात् सोमांगेष्वादिषु अग्न्यान्वाधानं न विधत्त इति तद्विहास्निप्य समाधीयते
नान्वाधानमभिधाना शार्थं अर्पितदेवता एवं पूर्वेद्युर्गृहीत्वा श्वो भूते यजेत इत्यर्थवादवशा
देवतापरिग्रहार्थत्वं तत्र एव ममाग्ने वर्चइति पूर्वमपि परिगृह्णाति इत्यत्रापि इध्मानाइति मंत्रव
र्णाविशात्परिग्रहलक्षितानामन्वाधानेन प्रथमाग्निदेवतोपलक्षितास् सर्वाः प्रकृता देवताः सस्कुर्या राम०
दित्यर्थः । अतश्चाग्न्यंगिके अग्निधारणे ज्ञायमाने पितृदर्थत्वाभावात् सामान्यादिषु देवतापरिग्र १२

हार्थं कर्त्तव्यमेवाग्न्यान्वाधानाभिप्रायेण त्वपि देवतापरिग्रहार्थं तत्तथापित्वन्यायतत्था
आग्नावैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाण इत्यग्निर्वै अवमो देवतानां विष्णुः परमो देवता
एवं तद्भयजः परिगृह्य दीक्षत इति च दीक्षणीयायां वाक्यशेषत्वस्या अपि देवतापरिग्रहार्थ
त्वावगते र्यत्कर्तव्येवं प्रसंगः । दीक्षिष्यमाण इत्यनेनचोत्तरकालत्वमात्रं विवक्षितं न जन्यत्वमि
ति तत्राथिकर्ष्ये विहाय व्याख्यानोपपत्तेः । न च दीक्षा सोमस्येति वचनात् तस्याः प्रधानमात्रार्थत्वा
पत्ते स्तद्देवतापरिग्रहमात्रेणानांगदेवतापरिग्रहः प्रसज्यत इति वाच्यं दीक्षायाः प्रधानमा
त्रार्थत्वेपि तदंगनकीभूत दीक्षणीयायास्त्वार्थवादिकदेवतापदसंकोचे प्रमाणाभावेनांग
प्रधानसाधारणदेवतापरिग्रहार्थत्वावसायात् तपत्व चसत्रकारादिभिरंगीकृत्यैव दीक्षणी
याः प्रधानमात्रार्थत्वं प्रधानदेवतायां वैश्वदेवग्रहीयायां विश्वशब्दस्य सर्वदेवावाचित्वात्स
र्वेषामेव देवानां देवतात्वप्रतिपत्तेरंगदेवतानामपि तस्य ग्रहेणा परिग्रहस्य संभवापत्तिरिति

भा॰दी॰ समाहितं तं द्विश्वदेवशब्दस्यादित्यविश्ववसव इति त्रिका दीक्षणीयागणविशेषेण कृत्वा व
१३ गते दीक्षणीयायां देवतापरिग्रहार्थत्वपक्षे प्रधानमात्रार्थत्वे प्रमाणाभावाच्चोपेक्षितं अतो दे
वतापरिग्रहार्थत्वपक्षेऽपि युक्त एव प्रायणीयादिषु प्रसंगः दीक्षणीयायां तत्तस्यामवस्थायां
देवतापरिग्रहस्य जातत्वात्कर्तव्यमेव तद्देवतापरिग्रहार्थमन्वाधानं च स्तः तस्माद्दर्शिका
न्वाधानवाक्ये अग्निपदस्योपलक्षणार्थत्वे प्रमाणाभावाल्लिंगोपसंख्यस्कन्नान्वाधानस्या
ग्निधारणमात्रार्थत्वप्रतीते दीक्षणीयापामलस्कन्नादौ सोत्साहकत्वावगतेर्नोभयोर
पि देवतापरिग्रहार्थत्वमर्थवादस्तु भयत्राप्येवकालोपवत्कृत्वा दंगाकारेण च प्रधानदे
वतायाः संबंधावश्यंभावात्तत्रैव परिग्रहत्वोऽपेक्षायास्तु तिमाचं अतस्तस्मात्सोमार्थाग्निधार
णे व दीक्षणीयायामपि प्रसंगसिद्धेस्तस्यामपि नान्वाधानसन्नहनं च दर्शपूर्णमासयोर्यौ रामः
क्तौ पत्नीसन्नहनसत्रोति विहितं सन्नहनं प्रायणीयादिषु दीक्षाकालकृतेन योक्त्रकरणा १३

कपत्नीसन्नहनेन प्रसंगसिद्धेर्न कार्यं दीक्षणीयायां तु कर्तव्यमेव बोधायनेन तत्रापि ने
त्यलक्षणं हि तद् दृष्टार्थं येन तामरणान्यायेन पुनः क्रियेत वासोधारणार्थं स्वरूपदृष्टप्रयो
जनसंभवे अदृष्टकल्पनस्यान्याय्यत्वात् न चात्रान्वाधानवदपि वासोधारणार्थत्वाप्रतीतेः
सकृन्नुतस्यापि पुनस्तदीयसंभवसंभवेन सचमोपेप्रयोजनांतरकल्पनायामपि पदार्थाति
शयार्थपरिव्याणीत्तरवचनसंनहनोपपत्तेरिति वाच्यं उपदिष्टपरिव्याणस्य विकृतौ प्रयो
जनांतरकल्पनायामपि प्राकृतस्य सन्नहनस्यासन्नद्धसन्नहनार्थत्वेन तत्र सप्रयोजनस्य वि
कृतौ कार्यान्तरकल्पनानुपपत्तेः पदिष्टसन्नहनप्रकृत्ते वेदनपासोधारणार्थमपि तु करिष्य
माणकर्मशीघ्रलाधानार्थमित्यत्वे तत्तथापि समर्थसन्नहनेनैव बलाधानसिद्धेः प्रायणीया
वेव तस्यैव प्रकृतिवत्कर्मणीयापत्तेः प्रसंगसिध्यविरोधाः अनुविधानात् दर्शपूर्णमासयो
रासपाशनमान्त्वेत्तत्र दपि सोमार्थत्वेनपयोव्रतेनैव प्रसंगसिद्धेर्न प्रायणीयादिषु कर्तव्यमनच

भा॰द्वा
१४

तयोर्विनातीयत्वप्रतिपादनकत्वेन कार्यभेदः संक्रमगतप्तेः कृत्वनुपयोगित्वेनानुषंगिकत्वेपिभयो
रनन्वाभावात्तत्प्राणाधारणास्यैवकत्वप्रयोगित्वयाप्रयोजनत्वेन प्रसंगोपपत्तेः। शेषभक्षाः। एवं
तर्हि यजमानकर्तृकाणां शेषभक्षणानामपि प्रयाजशेषाभिधारणन्यायेन कर्तृसंस्कारकत्व
स्यापि सत्वान्याणाधारणार्थत्वोपपत्तेः। सत्यपि द्वितीयाशेषप्रतिपत्त्यर्थत्वे अस्मदुक्तप्रय
जशेषाभिधारणन्यायेनानुमानिकस्येव प्राणाधारणास्य प्रयोजकत्वावगतेस्तस्य च प
योजनत्तेन प्रसंगासिध्युपपत्तिरिति प्राप्ते आरणपाशन नियमविधिनात्तेनेव प्राणाधारणाव
र्तव्यत्व प्रतिपत्तेर्यजमानभक्षणस्यैकवत्तशेषप्रतिपत्त्यर्थत्वावसायात्तस्य च प्रसंगासिध्यभा
वेन भक्षयितृव्यपदेश्ययजमानेन प्राशित्रीयादिष्वपि सेक्तः प्रत्तत्वाच्चद्वीडाशीयादिषुवोस्क
प्राप्तन्वाहार्ये दक्षिणासोमार्थदक्षिणायेव प्रसंगादानतिसिद्धेर्न हेयानादवदासिद्धासोम
स्यांगसाधारणपनिवर्तकत्ववत् प्रसंगनिवर्तकत्वमपि रोकं तथात्वेऽनतिभेदेन कर्तृ राम॰ १४

भेदापत्तेरंगप्रधानानामेकतन्त्रप्रयोगभेदप्रसंगात् अतः सोमांगं दक्षिणायैवानन्तत्वात्तदान
त्युपदेशोवनेपि च पशुप्रयाजादीनामिव तदंगत्वानपायान्नदीक्षणीयादीनामर्थवद्दक्षि
णाप्रयोजकत्वं न चैवमंगसाधारण्यनिवृत्तिप्रयोगाभावाग तद्धिकृतौ निरूढपशावौ दाहा
शशतननिवृत्तिप्रयोजनकत्वात् अतएव तत्र प्रकृतिप्रकृतितोन्वाहार्यो चात्रार्थासिद्धपाकि
चिदानतिसाधनद्रव्यं दक्षिणेत्यत्र विस्तरः। शेषभक्षाः। ऋत्विक्कर्तृकाणां शेषभ
क्षाणां द्वितीयायाशेषप्रतिपत्त्यर्थत्वेपि प्रयाजशेषाभिधारणन्यायेनानत्यर्थत्वस्यापि स
त्वाकरिष्यमाणकर्मशिवत्वाधानार्थत्ववत्संभवात्तस्य च चानुमानिकतयाप्रयोजक
त्वावगतेर्पुरुषवद्दशदत्तदक्षिणायाप्रसंगदतिशप्तेन्वाहार्यदक्षिणानियमविधिवदे
न शेषभक्षणास्यानत्यर्थत्वाकल्पनात् केवलं द्वितीयाशेषप्रतिपत्त्यर्थत्वे प्रयाजशेषन्या
येन च ऋत्विक्प्राणाधारणापरपर्यवसानाधानार्थत्वमितिदृष्टं दशमाद्येऽत्रतीनात्रापि प्रसे

भा॰ह्रा
१५

गसिद्धिः। प्रवृत्तचरणत्वात्तद्दर्शितं कं होतृवरणमपि सोमार्थेन न संमंत्रकेन वरणेन वरणोद्दीस
णीयाहि पुनःप्रसज्यते प्रकृतौ तस्याददृष्टार्थत्वात्तत्प्रवृत्ते पुरोहिते पुचित्यदार्थेषु पश्चादग्निर्दैवो
होतारे वा स्मसूदित्यादिना प्रकृतौ होतृवरणमाम्नातं तच्च तत्स्य प्रवृत्तत्वेन दृष्टार्थत्वानु
पपत्तेरदृष्टार्थत्वावसायादप्रवृत्ताभ्यर्थनरूपत्तयादृष्टार्थेन सौमिकवरणेन न प्रसंगसिद्धिः
न च प्रवृत्ताभ्यर्थनत्वेपि ब्रह्मवरणावदृष्टार्थत्वापपत्तिः। ब्रह्मवरणस्यापि हि पुर्वै पुर्वै विकारणा
भ्यनुज्ञानार्थं प्रवृत्तस्यापि प्रणीताप्रणयनात्पूर्वैकाणाद्विति च य्यपौर्णमास्यां तावद्वेदिकरण्य
स्य हापरभिवासनोत्तरकालीनत्वेन पूर्वेद्युः कोलात्वाभावा स्वणीताप्रयापनकालीनब्रह्मव
रणस्याप्रवृत्ताभ्यर्थनरूपत्तयाऽदृष्टार्थत्वोपपत्तेः। अमावास्यायामपि वेदिकरणापकर्षे
तदंगभूतब्राह्मणानुज्ञानार्थं तया ब्रह्मवरणस्यापि अर्थक्रमेण पाठक्रमेवाधित्वापकर्षसंभव रास॰
नाप्रवृत्ताभ्यर्थनरूपत्तयाऽदृष्टार्थत्वापपत्तेः। न चैवं होतृवरणेपि अर्थक्रमानुसारात्सामि १५

धेनीतः पूर्वं करणापत्तिः। अवत्सामिधेनीरन्वाहेति होतृवरणावाकृशोधेरणपाठक्रमबाध
कत्वाप्रतीतेः। अपंदिन स्वत्ते वः सामिधेनोमात्रतात्पर्यग्रावरणपर्युसस्तः। तथात्वेनिविम
त्रेभ्यः पूर्वकरणापत्तेः। किंत्वेकवाक्यत्तालाभायपाठक्रमाबाधमात्रतात्पर्यग्राहकः। अ
तश्चास्यापकर्षान्नुपपत्तेः। प्रवृत्ताभ्यर्थनरूपत्वेनादृष्टार्थत्वान्नप्रसंगः। ब्रह्मवरणस्यादृ
ष्टार्थत्वापुत्तुणावप्रसंग इति वैषम्यं। नच प्रवृत्ताभ्यर्थनरूपत्वेनादृष्टार्थत्वानपि लोभवशी
नसेदेहेपि यत्किंचित्कर्मणि प्रवृत्तस्यापि कर्मकरस्य मध्ये निष्क्रापकलिरवनादेर्दृष्टार्थत्व
वद्वरणसंदेहेपि स्वलोभेन सामिधनीषु प्रवृत्तस्यापि होतुर्मध्ये वरणस्यादृष्टार्थत्वोपपत्ती
रिति वाच्यं संदेहेन प्रवृत्तस्य कदाचित्परिवृत्तावेतत्प्रधानयोरेककर्तृकत्वबाधापत्तेरवश्य
यजमानो नैव सामिधेनीतः पूर्वं कृतस्य लौकिकप्रवृत्ताभ्यर्थनाद्युपायस्य करणेनास्य च वर
णावहृत्तवरणात्वरणस्यादृष्टार्थत्वावश्यकत्वात्तन्न तृणावावृत्तइतितस्यस्यचैध वरणाभ्युदसे

भा०व्या०
१६

वार्थम् एवं च कृत्तयाऽप्यावरणावच्छिन्नत्वमेवावच्छेदार्थप्रयोजकं न प्रवृत्तमर्थं नत्वमित्य
पि ध्येयं। न चैवं सत्यपि अवच्छेदार्थकेऽपि केवलं रत्नावरणाशब्दलोपश्चाविकृत्वापत्तिः प्रार्थनस्यैव तत्स्य
द्वावाच्यत्वात् अत एव सौमिकेन वरणेन व्रह्मवरणमेव प्रसज्यते न तु स्तोत्तृवरणमितिसिद्ध
वस्तुतस्तु सौमिकस्य वरणस्य प्राकृतत्वरणावदेव कर्तृसंस्कारकत्त्वापत्त्या प्रधानार्थत्वं दृष्टि
णावच्च प्रधानमात्रार्थत्वाग्राहकाभावात् नैमित्तिकस्येव वरणादेर्वाच्यतावच्छेदप्रसंगः। वैच होत
वरणस्य तु सोमिनेतितद्ध्येयं प्रासंगीकीचास्मिन्नपक्षेऽप्यापसंगतिः मज्ञोत्पत्तिः। आतिथ्यादौ प
सहगीषोमीयार्थसाधारणमेकमौपदेशिकाम्बावत्यादिगुणाचर्हिः। एवं चतुर्थं तत्र
क्षेदे न प्रोक्षणादपूर्वस्य तत्र देशेन भेदे नु प्रायाम्स्त्रपिचर्हिःषएककत्वादेदेनन कार्योऽनवा
ग्नेःपात्रारणां वारार्थकत्वेऽपि प्रतिप्रयोगसमागमेवेहवन्तत एवैतौ व प्रोक्षणादिद्विन्नयापूर्वकमाश्र
मेदेन करणोपपत्तिरितिवाच्यं। व्रीहिप्रोक्षणादिवद्धल्कार्यकृतदेशेन पपत्तेः स्तत्पत्तिस्तत्का   सम०
१६

र्यकृतागमत्तकलोपहितत्तद्व्यक्तिगतसंस्कारजन्यादृष्टं प्रतितत्कार्यातिमकार्यत्वेन नाशकत्वं गी
काराद्गीषोमीयपूर्वैरेवतन्नाशोपपत्तेः। अग्निपात्राद्देस्तावत्कार्यकृतदेशेनोत्पत्तिस्तत्का
र्यकृतागत्तातिमकार्यत्वेन नाशकत्वेतिविनस्तमार्गस्यतत्स्यात्तितो माद्यनंगत्वात्तत्र तस्तत्रत
वक्तित्तन्यादृपत्वावच्छिन्नं प्रतितत्कालीनत्तोपहितातिमकार्यत्वेन नाशकत्वेतिविशिष्येकाक
र्यकारणाभाववाकल्पनान्ततत्प्रयोगवत्वंतिमत्वेनैव नाश इतिप्रतिप्रयोगभेदः। आवश्यक
श्चायं प्रकारो ह्यपसंकारणायागवित्तपसाधारणस्यापनिहार्थमित्यलं। तदिह तद्देवबर्हिष
एककत्वान्नप्रोक्षणादीनां भेदः। तत्रापि नतेत्रत्वं आतिथ्यां प्रयोगमध्यवर्त्तित्वेन गहामारावि
शेषत्वात्तत्र आतिथ्यार्थमेव कृतानामेषां अग्नीषोमानुपसदग्नीषोमीयोपिकारकत्वेन चेतरयो
स्तत्र मध्ययाताभावात्कथं प्रसंगः। तत्र मध्ययाताभावेऽपि तज्जन्योपकारसत्वेन प्रसंगोपपत्तेः
अत्र च च्छेदेनतैचेसौवोपकारोऽनिवर्हिःसाधारण्यविधेस्तत्र तोविनानुपपत्तेः। प्रोक्षणादीनां तत्प्र

भा॰म॰ संग इति केचित्तत्वसत्तस्य छेदनस्यापि अप्रमाणाविशेषत्वाविशेषादिति यार्थं यद्वा स्थै
१७ वप्रसंगेनोपकारकत्वोपपत्तेस्तादृशच्छेदनोपात्तस्य चर्हिषो वचनासाधारण्ये वाधकाभावात
त्रापि प्रसंग एव यदि न गृह्यमाणाविशेषत्वेपि बर्हिषि त्रितयोर्देशात्तत्र क्रियमाणसंस्कारराणामपि
त्रितयोर्देशोपपत्तिरिति विभाग तदा सर्वमंत्रेष्वेव भेदाभावमंत्रेणाच प्रसंगिकी व्यध्याय संग
तिः। एषसंस्काराणामपि चाग्नीषोमीयकाले क्रियमाणानामन पेक्ष विद्यायां तत्र स्वबर्हिः प्रतिपत्तेः।
परमग्नीषोमीयार्थत्वमेवरतरयोः स्वेष्टिस्तत्र प्रतिपत्यनतिदेशायुक्तं चेत्तत्संस्कारव्यक्तेः पशुपयेव
कार्यत्रिज्ञासार्थीस्यसंस्कार्यबर्हिष्व्यत्स्य पशुपकार्यकरस्य वह्न्युपस्थितपस्थितत्वेन फलत्वोपपत्तेरेकप्रयो
गवृत्तित्वेन विलंबोपस्थितिके नाति स्थामात्रोपकारकत्वकल्पने प्रमाणाभावात अत एव यत्र नाग्नि सं
मार्गो दीक्षु रस्य फलत्वोपपत्तिस्तत्रोपस्थापकापेक्षायामेकप्रयोगवृत्तित्वस्यैव कार्योपस्थापकत्वादस्य सम॰
स्यापितस्यैव फलत्वमिति देशएषकृत्वात तदेव बर्हिर्देशभेदेन तत्संस्कारकस्य तत्त्वासाधमानह १७

विराधाराभतं तत्पुनरग्नीषोमीयार्थपदेशोत्तरवेदिस्तीर्थत्तद्देशभेदेनात्तत्संस्कारकस्य तत्त्वासाधमानह
विराधाराभत्तबर्हिः संस्कारकस्य वास्तरणास्यावतेस्त्र योजनानुरोधेनावश्यकत्वात अत्र प्राकृतस्यस्त
रणास्याव तोतस्या भतोमेचोपावर्तत इति न तत्र प्रसंगस्तत्रैवाग्नीषोमीयकालपरित्तमंत्रजन्यसम तस्य्नीषोमी
पकालीनस्तरणवेलायामविद्यमानत्वात्तत्सिद्धमेवेदं शिष्यहितार्थं मुक्तं। सन्नहनतस्यैव बर्हिषः प्राग्नेषो
मीयस्योत्तरवेदिस्समीपस्तरणार्थं पुनः प्रयोक्तव्यं न वेति चिंतायां पूर्ववत्सन्नहनमाहरणे च क्रियते तत्र प्रा
कृतोत्तमंत्रोपघातग्रथितयात्तवहस्पत्ते सिद्धा दृशमीत्येतो किं पुनः प्रयोक्तव्यो न वेति चिंतायां पूर्ववत्स्त्रिया
वनावा वृत्तिरितिप्रापणे नेहं प्राकृतं सन्नहनेस्तदुत्तरकार्यविहितसन्नहनसेवनत्वात्त किं त्वार्थिकं
अतस्त्रवैवप्राकृतासन्नहनागभतोमेचोनाचैवमाविठमहोतियाज्ञिकास्कत्तत्रमंत्रे पठंति ते समय
मानापनेयद्यार्थिकमिदं सन्नहनं तत्रापि तस्य प्राकृतकार्यकारत्वमेव प्राकृतस्य सन्नहनस्य वेदि
स्तरणायाहरणासिद्धिरेवप्रयोगान्नं विहितस्य सन्नहनस्याप्रयोजनानुरोधेनावर्तते रेव स्तरणाबर्हि

भा॰द्वा॰ तिमंत्रावत्तौ न किंचिद्बाधकमिति आहरणोत्पन्नत्तौ विहारदेशप्रापणानुकूलत्वमंत्रो विहितौ न
१८ त्गार्हपत्याद्धि देशप्रापणानुकूले द्दहुत्वे दिदेशप्रापणानुकूलत्वे वावतिरितिपुक्ते मंत्रावतिशंक
अतराच च स्मात्तु मयपाप्यत्र प्रसंगात् एवं पित्र्यावल्पभावमात्रेणाप्रासंगिकी अध्यायसंगतिः इति श्री
खंडदेवविरचितायां भाट्टदीपिकायां द्वादशस्य प्रथमः । विहारे आहवनीयादीनां आधाने नोत्पन्ना
नां प्रयोजनायेसायांसामर्थ्यादाग्निसाध्यश्रौतस्मार्तलौकिकसाधारण्येन कार्यमात्रार्थत्वे आह
वनीये जुहोति गार्हपत्ये हविः श्रपयति दक्षिणाग्रावन्वाहार्यं पचति इत्यादिवाक्यानि तत्र वपुरस्त
न्वादः । अथ वाक्यरेते वां विनियोजकत्वं तथापि कार्यांतरणामप्रमेयपक्षायां लाघवाद्दर्शने यामेव
प्रसंगात् गृहमांत्रमंतराप्येगोरवादिति प्राप्ते सामर्थ्यादेव सर्वार्थत्वप्राप्तावतद्विशेषविनियोगवि
धिवैयर्थ्यादेव न सर्वार्थत्वं नाप्यनयत्र प्रसंगसिद्धिः । अतएव नाग्न्यंतरसाधारण्येनापि तेषां ग्रह राम॰
णां आपत्ताद्दहिर्भावनिषेधाच्च श्रौताग्निषु पाकादिनिषेधस्य समतिष्ठ अवशाच्च स्मार्तलौपास १८

नाग्नेर्वा च निकत्वाच्च तस्मादौ तेष्वेव होमादिषु विनियोगः । अत तत्र एवं मांसीयंति ह वा एतस्य ज
हतो यजमानस्य अग्नयो यजमानमेव ध्यायेति यजमानं संकल्पयंति पचति ह वा अस्य गृहे
वधा मांसम अथैतेषां नात्तो मासमांसाशाविषतरत्वेऽपि प्रबंधविगात्र्यमांसस्पर्शनिवृत्तिलिंगं लौ
किकमांसस्य चान्याग्निषु पाकलिंगमुपपद्यते पत्नमांसं न पुत्तस्मिन्नाहुतौ जुहोतीति वा मां
तरात्मसाराद्दाहवनीये वपाश्रपणस्य विहितत्वात् पायेनिषेध इत्यसाधकं च वस्तुतस्तु विकल्पाप
त्तेर्हि दक्षिणाग्निकहोमादिविधिसंनिधौ पचवान्हयमपीदं दक्षिणाग्न्याधिकरणकपाकीव्रत
अयत्ता विषयेषु हि होमादिना मांसमेव वृत्तकार्ये प्यादीयते त्तदात्तत्वाकस्मात् पेहृदक्षिणाग्नेय
पुरोडाशः । सवनीये सवनीयसवनीये पशुपुरोडाशेति देशप्राप्तः सवनीयहविर्भिः प्रसक्त्यते प्र
कृतौ तस्य परिहाराय तर्हि पशुपशुर्हि वषामतिवदतीयद्धी हि पशुपुरोडाशो भवति छिद्रस्यापि
हित्वा इत्यर्थवादाच्छिद्रापिधानार्थत्वं अतश्च पशुपुरोडाशकार्यस्य छिद्रापिधानस्य सवनीय

भा॰दी॰ १९ हर्विभिरेव प्रसंगात्सिद्धेः सवनीयपशौ पशुपुरोडाशो न कार्यः एवं प्रातःसवने चरंति पुरोडा
शेन माध्यंदिने इति लिंगाच विकल्प इति प्राप्ते ऽभयत्र प्रत्यक्षविरोधात् हार्थवादिकसिद्धापिधा
नार्थत्वस्यानपेक्षितत्वस्यानुपपत्तेः। पशुपुरोडाशदेवतासंस्कारार्थत्वस्य दशमे स्थापितत्वाच्चाप
हुपकारकैः सोमांगैः सवनीयाहि हविर्भिः पुरोडाशकार्यसिद्धेरभावान्न प्रसंगानुपपत्तिः एवं च पु
रोडाशेन माध्यंदिनं रत्यस्यापि नयाखिकत्वकल्पनातिन विकल्पः। सिद्ध एवं चायमर्थः कल्पसू
त्रकाराणान्यायोपन्यासपूर्वकं विकल्पाभिधानानामतत्तन्निराकरणार्थमुक्तः। हवीरुत्तरशेष
णामासयोर्हविष्कृदाह्वानमवघातार्थमुलूखलदेशप्रापणफलकं विहितं न तत्सान्नाय्यार्थं क
त्वाच्चिंतयात्तद्यदि सर्वार्थं तदा पशावपि पात्रप्रोक्षणानंतरमतिदेशेन प्राप्यते अत्र तत्रदेशि
देशेन सवनीयपशावपि वा पात्रप्रोक्षणानंतरमाहत्ताह विष्कृत्तन्मध्ययाति तां प्रातःसवनिक रामः १९
माध्यंदिनसवनिकहविषामप्युच करोतीति न तदर्थ एषगात्तत्त्व्या सर्वार्थत्वपक्षे हि हवि

ष्कृदाह्वानेनोलूखलदेशप्रापणफलकेऽपि न विहारदेशप्रापणफलके। अतस्तस्य विहारप्रापितत्वा
त्तस्याः कार्यनिष्पत्तिपर्यंतं सहावस्थानादेव प्रसंगः। यदि हि ह्यावांतरप्रकरणात् अवघातमात्रार्थं ह
विष्कृदाह्वानमुलूखलदेशप्रापणफलकं हविष्कृत्समाख्याचावघातकरणमात्रे शेषोपपणात्तदा
एकावघाते कृते पुनर्द्वितीयेनेन गार्हपत्यमुपविशायास्तस्या द्वितीयावघातवेलायां पुनरुलूखलदे
प्रापणफलकमाह्वानमावर्तेत इत्युक्तरूपमेकादशे सर्वार्थत्वपक्षे तु विहारदेशप्रापणफलकस्या
ह्वानस्य सकृत्करणेनैव कार्यसिद्धेर्युक्तः प्रसंगः। पशौ तु कत्वाचिंत्यातार्तीयसवनिकसव
नीयहविःषु सोमस्य चरावाश्विनग्रहिकपाले च सवनीयपशुपाकोनते क्रियमाणामेदेन पुनराह्वा
तव्या हविष्कृत्समाख्यायात्तस्या हविःकरणमात्रप्रयोजकत्वेन वृत्ते पशुपाके तस्याश्चापवृक्त
त्वादिति प्राप्ते समाख्याया उपलक्षणत्वात्सहायकरणमात्रार्थत्वासाभ्रतः पाके वृत्तेऽपि क
र्यपत्नीसंयाजांतरमप्यापद्विधानात्पत्नीसंयाजांतत्स्या विहारदेशसत्वाद्युक्त एव प्रसंगः अनि

भा॰द्वा शियज्ञे काम्येष्टिकाण्डे अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यो रक्षोभ्यो बिभीयादिति यागावि
२० धाय तस्याममावास्यायां निशि यज्ञं तेऽनेन कालो विविहितः कालद्वयविशिष्टप्रयोगविधाना
चनवाक्यभेदः न त्विह निशि वा दर्शे किं तंत्रे प्रसज्यते न चेति चिंतायां यक्षपुरोडाशवत्तंत्रमध्यपा
ठाभावान्न प्रसंगः न ह्यत्र प्रकरणमस्ति येन तंत्रमध्यपाठः शक्येत नाप्यमावास्याशब्दस्य चाम
वचनत्वाद्ध्वा केसैव तत्तंत्रमध्यपातानवगमे तस्याममावास्यायामपराह्ण इति वत्कालवाचि
त्वेन कर्मलक्षणानुपपत्तेः न च राद्धेन तत्तत्र मध्यपातानवगमेऽपि दर्शप्रयोगस्य नियमेन दिवा
अनुष्ठानाद्रात्रौ क्रियमाणस्यास्य तंत्रमध्यपातावश्यंभावः अपराह्णपर्वप्रतिपत्संधौ रात्रि
कालीनामावास्यायोऽन्वाधानपूर्वदिने क्रियमाणस्याप्यस्य तंत्रमध्यपातावश्यंभाव राम०
नियमाभावात् अतोऽवश्यं यागापादवप्रयोगविधानान्नास्य प्रसंग इति प्राप्ते तंत्रमध्यपातनि २०
यमाभावेऽपि सर्वत्र प्रकृतौ विकृतौ चांगविधिषु अन्यत्र उपकारलाभं गानि नक्रयादित्येवमेव

लाघवेन विधिकल्पनान्निशीष्टावपि पदैव तंत्रमध्यपातस्तदैव प्रसंगनन चैवमपि निशीष्टे
पूर्वकृतान्वाधानादिद्वितीयदर्शप्रसंगेऽपि क्रियमाणप्रयाजादिजन्योपकारस्य अन्यतोऽलाभात्तदंशे
न प्रसंगो वैपरीत्यापत्तिर्दितीवाच्यं निशीष्ट्यर्थं क्रियमाणप्रयाजादिजन्यापूर्वाणां तत्स्मरमापूर्वयोवत्त
रत्राहतातत्र्यर्थानां तदुत्पन्नेन नाशावश्यंभावेन चैपरीत्यकल्पनानुपपत्तेः अतो दर्शप्रयोगविधि
नाऽवश्यानुष्ठापनात्तेषामेवोपजीवनेन निशीष्टिप्रयोगविधिलाघवेन दर्शत्राह्मणातद्विशाल
शवस्थ परमापूर्वोत्पत्तिः अनन्यत्वे अतस्थ्ययुक्तैव तत्र कादाचित्कोऽपि प्रसंगः आवश्यकत्वा
येऽग्निप्रणायनवत्तोयापनाप्यन्वाधानादेशेऽभवतोऽपि यानि तद्ध्यावर्हिः प्रभृतीन्यशक्यप्रसं
गानि तानि त्वावर्त्तत एव न चैवं विकल्पं तरायामपि सौर्यादीनां दर्शोद्यर्थान्वाधानस्य प्राप्तेरेवक
२२ तत्वेन तत्तंत्रमध्यपातावश्यंभावात् प्रसंगापत्तिः सौर्यादिष्वाग्नेयातिदेशकस्यापि प्राप्तेः का
लस्य सत्वेनागत्या विरोधस्यायनवाधानुपपत्ते दर्शोद्यर्थान्वाधानस्य वत तद्वाभस्यैचित्येन दिव

तिकरणोत्तरमेव दर्शपूर्णमासारंभप्रसंगानापत्तेः नचैवमपि यत्र साकमेधादौ आधेयश्चैवाग्नि
भा०द्वा प्रणयने कृते तत्रैतदेष्ट्यादौ प्रयाजादिप्रसंगापत्तिः तत्र पर्वैष्टिषु पूर्णप्रयोगस्य समानत्वादपि च
२१ नात्रैष्टेवाग्निषु कृतेष्टिकरणोपि प्रसंगानापत्तेः अन्तरावता दर्शाद्युत्तरेष्टिषु प्रणयनस्य वा
